दं० टि० ॥ श्रीगणेशाय नमः ॥ विद्वतः श्रीधरनन्दनस्य वाक्यं जगत्यस्तिमद् दण्डिनोऽलंकृतौ टीकां कुरुते वादिघंघलः
वैदर्भस्य गौडीयमार्ग विभावनाय परिच्छेदे माधुर्यमाविख्यातुनो चार्येण तद्रूपाति द्विपदाशक्तिः सानुप्रा
॥१॥ सासमावहेत्सनुप्रासप्रसंगेन वर्णावृत्तिरनुप्रासलक्षणाधिकारे प्रसंगतो यमकमप्युद्दिष्टं तत्तु नैकान्तमधुर
मतः पश्चाद्विधास्यत इति न प्रपंचितम्। तदिदानीमसाधारणश्लेषादिसाधारणास्वभावाख्याद्यलंकार
जातमुपवर्ण्य विस्तरप्राप्तमव्यपेतेत्यादिना यमकलक्षणं निर्दिशति। वर्णानामक्षराणां संहतेः संघातस्य
विशेषणपदपदार्थोऽनुलोमप्रतिलोमादिना पाश्चाद्वृत्तिरावर्त्तनं पुनः पुनरुक्तिः। किंभूताश्चव्यपेतः पद
पादादिनाऽव्यवहितः व्यपेतो व्यवहित इति लक्षणमुक्तम्। इदानीं तद्वैसादिनाऽस्य विषयं निरूपयति।
पादानां वृत्तस्य जातेर्वा आदिश्च मध्यश्चान्तश्च गोचरो विषयप्रदेशस्थानं यस्य तत्सादानामादिमध्यान्त
गोचरं। इदानीं तद्भेदानाह एकश्च द्वौ च त्रयश्चत्वारश्चेति च ते पादाश्चेति पुमानि यमकानि तेषां विक एम०
ल्पनमाभेदाः कृतिभवन्तीत्याह। आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः। आदिश्च मध्यश्च अन्तश्च मध्यां ॥१॥

तौ च मध्यादी च आद्यंतौ च सर्वतश्च सर्वेषु पादेषु सर्वेषु त्रिष्वपि स्थानेंइति । तथा हि । तथ्यादिपादादिपम
कमेकमन्यत्र । पादमध्यमपरं । पदांतयोरन्यत्र । मध्याद्योरन्यत्र । आद्यंतयोश्चापरम् । पदस्यादौ मध्येऽं
ते चान्यत्र । एवमेकद्विः त्रिः चतुः पादानां आदिमध्यांतभेदैर्मध्यांतमध्याद्याद्यंतसर्वतश्च पादपादव्यवहि
तोभयसंकीर्णभेदत्तो संतां बहवस्तेषां यमकानां भेदाः सौकर्यापो निरूह्यसंतिस्थानं येषां ते संभेदयोनमः
। तेषु यमकेषु केचित्सुखेन क्रियंत इति सुकराः । दुःखेन क्रियंत इति दुष्कराः । तेषु यमयेषु मध्ये मदर्श्यंते केव
न । तथा हि । दिङ्मात्रदर्शनार्थं वक्ष्यते । सुकराव्यवहितामानेनेत्यादयः । दुःकराव्यवहितामधुरेणेत्येवमा
दयो व्यपेताव्यवहिताः । नयानयेत्येवमादयः । संकीर्णाधराधरेत्यादयः । दुष्कराव्यवहिताव्यवहितोभय
शंकाकृपाश्च । तत्राऽव्यवहितप्रथमपादादियमकमाह मानेनेत्यादि । मानेन गर्वेण मानेनैवं विधः प्रणयः
संबंधः सखि मा भूत् । मानमसुमेवंविधं प्रियतमविषयमाकार्षीः । रीतिकाचितकांतं प्रतिकुपितामानिनी
सख्येवमनुनीयते । हे सखि लंखंडिता विप्रलब्धा तस्य प्रियस्य कंठमाश्लिष्यालिंगपरमेवाप्रियं सत्रपं सल

द०टि०
॥२॥

ज्ञं कुरु। इयं साध्वी मया वमतापि स्वभावानुरक्ताऽनुनीतापि स्वयमागता। अहं पुनर्निर्घृणः कृताप
राधोऽपि न तामन्वेष्यामीति मत्वा लब्धपि गतायां सत्यं लज्जा भविष्यतीति॥ ॥ द्वितीयपादाद्यव्यपेतं यमकमुदाह
रति। मेघनादेन घनगर्जितेन। किंभूतेन। हंसानां मदनोदिना मदं नुनुदतीत्येवंशीलोपस्तेन। नुन्नमानं म
नः स्त्रीणां नुन्नो निरस्तो मानो यस्मिन् तत्। मदनः स्मरः समासहवि गाहते। अथ तृतीयपादाद्यव्यपेतं य
मकमाह। राजन्वत्यः प्रजा जाता भवन्तं प्राप्य सत्पतिम्। किंभूतं। चतुरं। क्वचितुरंभोधिरशनोर्वीकरग्रहे। च
त्वारो बुधयः एव रसना मेखला यस्याः सा तथाभूता च सा उर्वी च पृथ्वी तस्याः करः धान्यादि षड्भागादितस्य ग्रहे ग्र
हणे इति। चतुर्थपादाद्यव्यपेतं यमकमाह अरण्यं कैश्चिदाक्रान्तमन्यैः सद्म दिवौकसाम्। पदातिरथ
नागाश्वमिति सेनां गलात् द्वंद्वैकत्वं। तेन रहितैर्विकलैः रहितैस्त्वद्विषिमिरिति। एकपादादिविकल्पा
श्चत्वारः। प्रथमद्वितीयपादयोरादियमकमाह। मधुरमित्यादि। मधुरं रम्यं। मधुर्वसंतः। हे अंभोज
वदने पद्ममुखि वद ब्रूहि तव नेत्रयोश्चक्षुषोर्विभ्रमं विलासं। भ्रमरम्भ्रांसा भ्रमराणां भ्रांतिस्तया वि

रा०म०
॥२॥

डंबपतिअनुकरोति। किंस्युनु वितर्के प्रथमतृतीयपादयोरादियमकमाह। वारणोहस्तीरणोऽङ्गतं दा
मबंधनं यस्मादुद्दाम उछृंखलः वाशब्दः पक्षांतरे समुच्चये वा॥ हयस्तुरंगमो वा न। किंकुर्वतः नमतः अंतं
विनाशं नोऽस्मात्। यतो यस्मात्· तस्मादहो विस्मये· विक्रमस्तवेति। दुःखेन म्रियते यो वारणः तुरंगमो वा स
तेऽस्माद्रन विद्यते। तथाप्यस्मात्मारयसीमेकाकिनो विजयित्वमाश्चर्यहेतुरित्यर्थः। प्रथमचतुर्थपादादिय
मकमाह। एजितेरित्यादि॥ राजितैः आजौ संग्रामे तैस्तापेन तीव्रत्वेन जीयते अहिहस्तात् राछिद्यते। वाद
शैन्यपेनं केवलं जीयते नीयते च पुनः पुनरपितु पृथ्वीं वसुधा पृथ्वी। वसु वित्तं तस्य धारादानप्रवाहस्तया।
अत्र वसुधास्याः प्राणिनो वसुधाशब्देनोच्यंते· तास्यात् तत्रास्वप्नां मे चाः क्रोशंतीतियथा॥ द्वितीयतृती
यपादयोरादियमकमाह। करोतीति कुह्जे। कलिकामंजरी। सहकारस्य चूतसंबंधिनी उत्कलिका उत्कं
ठातया अरं अधिकं मम मनो मन्मनो मधुरित्तं· न केवलं सैव· मन्मनो मधुरोऽप्येकः षमत्तकोकिलनि
स्वनः। मत्ताश्चासौ कोकिलश्च तस्य निःस्वनः शब्दः सवेत्यपि शब्दार्थः। सचोत्सुक्याधिक्यं करोतीत्यर्थः॥

द०टी० द्वितीयचतुर्थपादयोरादियमकमाह। कथमाक्षेपे॥ लब्धुपलंभाशा तवउपलंभः प्राप्तिः समागमः तत्र आ
शा आकांक्षा तस्या विहतिर्विघातः तस्यां विहतौ विघातेसति इहावसरे तादृशी दशा अवस्था नालं। न सम
॥३॥ र्था। अपितु समर्थैव। आरोढुं आक्रामयितुं। अंगनाप्रिया। अंगनाशिनी। अंगनाश्यपतीति सैवंशीला। या से
ति के। अपि सुभगाः कयाऽपि दूताऽभिधीयते तृतीयचतुर्थपादयोरादियमकमाह। निरुद्धपरिरुद्धके नेत्रे
चक्षुषी। केन तरुणा पादपेन। कथंभूतेन। बालैः पल्लवशोभिना। अभिनवकिसलयभाजिष्णुना। तरु
णा मुंचतु पुनः अलिव्यालीडितानलिनोभ्रमरः कर्षति भारयति बाधं तद् इति पावत्। कथंभूता अलिनः। नलि
नोन्मुखाः। पद्माभिमुखाः॥ द्वितीयादियमकविकल्पाः ४ षट्॥ तृतीयपादादियमकविकल्पेषु द्वितीयतृती
यपादयमकमाह॥ ॥ विशदेत्यादि॥ विशदाभ्रेताहंसीकुजते विदधाति। कं। अंतकामिषं अंतकस्यय
मस्यामिषं मांसग्रासं। केन। कुजितेन। कुत्सितं जितं कूजितं तेन। कुत्सितत्वं च विरहिजनमनःप्रातिकूल्यात्। तु एम०
क्ष। जये। किंभूता सीमसारसे सरःसु इदं सारसं तत्र॥ किं विशिष्टे॥ विशदामलसारसे। विशदं तत्आमलाः सा ॥३॥

रसायन्त्र।। प्रथमद्वितीयचतुर्थपादादियमकमाह।। ।। विषमं दुःसहविषमिव विषं। विषकारित्वेनाभेदो
पचारात्। मदनो विषमुक्तः। तमन्वेत्य सनु बध्नाति व्रजति। मदनं कामं। किं विशिष्टं। मदनंदनम्। नंदयति सुखय
ति नंदनः। न नंदनो ऽनंदनः। ममानंदनो मदनंदनः तं मदनंदनं। मत्पीडाकरम्। मलयानिलो दक्षिणापवनः।
। किमेकाकिनीत्याह। सहंदुकुलयाऽदुकलयासह। किं विशिष्टया। अपोढमलया। व्यपगतलांछनया।। प्रथ
मतृतीयपादादियमकमाह।। ।। मानिनी मे शर्मसुखं तनुतां तनोतु। किं चिकीर्षुः नेतुमिच्छुर्निघंगिलमिषु
धिलं। अनंगस्य कामस्येत्यर्थः। किं विशिष्टा। हारिणी। हारोऽस्यास्तीति। तं तव हारिणी मनोहरत्वाच्छीलापम
गी या। किं कुर्वतः। तनुतां पतः कृशतां व्रजतः।। द्वितीयतृतीयचतुर्थपादादियमकमाह।। जयता जितवता
। केन। त्वन्मुखेन कान् अस्मान्। अकथं न विद्यते कथाशब्दो यस्मिंस्तदकथं। नेतिप्रतिषेधे। कथमित्याक्षेपे
। न कथं जितं अपितु जितमेव। किं तत् कमले पद्मं। किं कुर्वतः कं उदकं अलंकुर्वतः भूषयतः। अलिमतः भ्रम
रमतः। दलान्यस्य संतीति दलि मतः। मम प्रियामतः प्रियायाः तस्याः संबोधनं मालिये।। ।। इति तृतीयपादयम

रं०टि० कविकल्पाश्चत्वारः॥ ॥सर्वपादादियमकमाह॥ रमणीकां ता॰ रमणी या रम्या। मे मम। पाटलापुष्पं पा
टला। पाटलामिव पाटलं ईषद्रक्तमंशुकं वस्त्रं यस्याः सा पाटला पाटलांशुका। केव। वारुणीव। वरुणस्येयं
॥४॥ वारुणी दिगिति। अरुणीभूतारक्ततामापन्ना, सूर्यस्येयं सौरी भा दीप्तिर्यस्याः सा अरुणीभूतसौरभा। सु
५ रभेर्भवः सौरभं सौगंध्यस्यास्पदं। सर्वपादादिविकल्प एकः॥ ॥एवमेकत्राव्यपेतयमकविकल्पाः पंचदशा
ऽभिहिताः इत्युक्तक्रमेणाव्यपेतपादादियमकं विकल्पितं॥ ॥इदानीं व्यपेतयमकविकल्पाः कथ्यंते
तत्र प्रथमद्वितीयपादादियमकं व्यपेतमेकस्मिन्पादेन संभवतीति भिन्नपाद एवोदाह्रियते। एकपादे
हि मध्यांतयमकमाद्यंतयमकं वा स्यादिति। एवं सर्वत्र व्यपेतयमकगतिरूह्या॥ तत्र प्रथमद्वितीयपा
दादियमकमुदाहरति। मधुरेणेत्यादि। मधुश्चैत्रः एणो हरिणः तस्येव दृशो यासां ताः एणदृशो मृग
लोचनाः। तासां मानं गर्वं शब्दशेषं नाममात्रशेषं करिष्यति। केन। सहकारोद्गमेन। किंभूतेन मधुरेण रम ए म०
णीयेन। सुगंधिना। सुरभिणा॥ ॥प्रथमतृतीयपादादियमकमाह। करोतीत्यादि॥ करो हस्तः ॥४॥

अतीवताम्रोतिरक्तः ॥ कासां रामाणां स्त्रीणां तंत्रीताडनविभ्रमं करोति । तंत्री वीणा तस्यास्ताडनं । तेन वि
भ्रमं विलासं करोतीति विधत्ते । न केवलं तामेव करोति । सर्वथ्यमपि भवति । तथा कांते दयिते श्रवणोत्पलं क
र्णावतंसोत्पलं तेन ताडनं हननं च करोतीति । वाशब्दश्च समुच्चये । अथवा शब्द औपम्ये वर्त्तते । तेन कांते श्र
वणोत्पलेन ताडनमिव वीणाकादन विभ्रमं करोति ॥ ॥ प्रथमचतुर्थपादादिमयमकमाह ॥ सकलापोल्ल
सनपेत्यादि ॥ सह कलया पोल्लसनेन वर्त्तत इति सकलापोल्लसना तया । कलापिन्या मयूर्या अनुपश्चान्न
सते । मेघाली जलधरमाला किंभूता । नर्त्तितेव । नर्त्तिता भ्रमिता । कैर्वातैः सकलानिः शेषा अपः पानीया
नि विमुंचति । अथवा । कलो मधुरध्वनिः सह तेन वर्त्तत इति सकला । नतु सकलेत्यपां विशेषणं । एकतः सं
धभावोऽन्यत्र चक्रमक्ष्यूरपधूरितिसमासांतप्रसंगः । तन्नास्ति सकलाइति ॥ ॥ द्वितीयतृतीयपादादियम
कमाह स्वयमेवेत्यादि । स्वयमेवात्मनैव । मानकलिर्मानो गर्वः कलिश्च कलहः । गलेत्तो मानकली यस्मात्त
त्कलन्मानकलि । अथवा । मान एव कलिः । कलिरिव दुःखहेतुत्वात् । गलदपसरत्तस्मात् । अथवा । माने

दं०टी० नभूतः कलिः क्रोध इति मध्यपदलोपी समासः। इदानीमेवेत्थंभूतं मनो वर्त्तते न पुनर्नीपस्तबकदंबस्य कलिका
मपि दृष्ट्वा विलोक्यकां न स्पृशेत् दयां मवष्यां नासाद्येत॥ ॥ द्वितीयचतुर्थपादादियमकमाह॥ आरुह्याक्री
॥५॥ डशैलस्य चंद्रकांतस्थलीमिमाम् नृत्यति एष शिखावलो मयूरः। किंभूतः। लसद्वाहचंद्रकांतः। चंद्रकाणामंता
श्चंद्रकांताः लसंतश्चारवः चंद्रकांता यस्य स तथा॥ किं कृत्वा। आरुह्य। कां चंद्रकांतस्थलीं चंद्रकांतमयापस्तेषां
5 स्थलीमिति। संबंधिनी क्रीडाशैलस्य आक्रीडंति दीव्यंति तस्मिन्निति। क्रीडाशैलः क्रीडापर्वतः तस्य तृतीय
चतुर्थपादादियमकमाह उद्धृता आक्षिप्ता गृहीता कुतो राजकात्। राज्ञां समूहो राजकं ॥ तस्मात्। उर्वी मेदि
नी हृता क्षिप्ता पाल्यते। अथ संप्रति भुजेन बाहुना त्वदीयेन। कथंभूता। वराहेणोद्धृता या सा। वराहेणाको
लवेषधारिणोद्धृता क्षिप्ता प्रलयकाले जलधेर्मा साविति। पुनरपि किंविशिष्टा। वराहेरुपरिस्थिता। वरः श्रे
ष्ठः स चासावहिश्च वराहिः तस्य वराहेरुपरिमस्तके स्थिता या सा विति। प्रथमद्वितीयतृतीयपादानामा राम०
दियमकमाह करेणोत्सादि। करेण बाहुना त्वदीयेन रणे युद्धे युग्मं तं नाशं करोसि एवं शीलोपसत्तेन। ॥५॥

केषां मत्तकरिणां द्विषतां मरातीनां मिसनमसापेक्षत्वेऽपि गमकत्वादुपपदसमासो देवदत्तस्य गुरुकुलमि
त्यादिवद्द्रष्टव्यः। हताः मारिताः करिणो गजाः भांति संध्याघना इव। स्रवत्स्वच्छो ततद्रक्तं रुधिरं येभ्यस्ते च
रक्ताः। अत एव संध्याघनैरुपमीयंते प्रथमतृतीयचतुर्थपादादियमकमाह पराः प्रकृष्टाः। अगः पर्वतः
तस्य तरवः तेषां राजिः पंक्तिः सा वातैर्धूतेवाधः पततीव भ्रमरै एरलस्तश्च मृत्वा तैः परागतमिव प्रपलायितमिव
का पिङ्गरं परागो धूलिस्तेन ततं व्याप्तमंबरं गगनं द्वितीयतृतीयचतुर्थपादानामादियमकमाह पाण्डुरस्तनु
वो मुख्यान् भगवान् पुण्यवान् ज्ञानवान्। विष्णुः श्रीधरः सदा नित्यं नवाम्भते घनाश्च नवघनास्तेषामिव द्यु
तिः छाया यस्य स नवघनद्युतिः। कृष्णवर्णश्च स इति विष्णुः। दानवकुलध्वंसी दानवा हिरण्याक्षकालनेमि
मधुकैटभादयः। तेषां कुलं समूहो वंशो वा तं ध्वंसत इत्येवंशीलः। पुनरपि किं विशिष्टः। सदानवरदंति। हा
सह दानेन वर्त्तत इति सदानः स चासौ दंती च तं हतवान् इति। स किल कुवलयापीडं नाम मत्तं करीन्द्रं हत
वान्। यद्यपि ब्रह्मभ्रूणवृत्रेषु क्विब्विहितो ब्रह्मादिषु चोपपदेषु हंतेर्भूते क्विप् नान्योपपदे। तथापि शिष्टप्र

द॰ टि॰ योग स्त्री नाट्यवति सा॰ वर्षपदानामादिमयमकमाह कोशिरः। अलिभिर्मरस्य समाः केशा यस्य तत्समकेशं का

लकुंतल मिसर्थः। समकेशा मिसक्त गगमकलाः समा मासोदेवदत्तस्य गुरुपुत्रा दिव द्रष्टव्याः। तेलवीयं। तथा मुखं

॥६॥ चकमलेर्ष्याकरं एकमलमंभोजं तस्मिन्नपीमत्यस्य सूयां करोतीति। एवंशीला अंततः कं पुरुषं अलि रव्य मगराय

6 करोषि। न किंचिदनंतः पातिनं करोषी त्यर्थः। केषु। अन्येष्विष्टपुत्रमार शीलेषु। केवलं। कमलेव लक्ष्मीरिव

लंबतीस प्रथम द्वितीयमयोस्तृतीय चतुर्थयोरादिमयमकमाह मुदाहर्षेणारमरां प्रियमता मं। प्रियं तान्वीतं

कर्तुमदभ्रजघनाः स्तमाः समर्पाइतिस्तबंधः किं विशिष्टाः। उदारमणिरणाभूषणाः। उदारा महांतोरी प्रियं

तस्य मणामः पद्मरागादयो भूषणानामासरां पासांताः। मदभ्रमद्दशाः। मदेन भ्रमंत्यो घूर्णमाने दृशौलोच

ने यासां ताः॥४॥ मदभ्रमद्दशः॥४॥ अदभ्रं विशालं जघनं यासां ता इति प्रथम तृतीय चतुर्थयोरादिमयमकमा

ह उदितैरन्यपुष्टानां माहतैर्मे हृतं मनः। उदितैरुद्गतैरन्यपुष्टानां परभृतानामाहतैराहृतं। तथा मा राम॰

रुतैः पवनैरपि दक्षिणैः केरलविषयादागतैः प्रथम चतुर्थयोर्द्वितीय तृतीययोरादिमयमकमाह॥ सु ॥६॥

राजितह्रीमापूर्णांतनुमध्यासते।स्मिमः।सुरमामदिरपाजिताह्रीर्लज्जायास्तांताः।त्तरतस्वेदसुराजितामु
खेंदवः४।त्तरतचासौस्वेदश्चत्तरतस्वेदः घर्मोदकं तेनराजिताः शोभिताः मुखेंदवो यासांताः४ इतिव्यपेत
पादादिपमकविकल्पोस्लयोदशः इत्युक्तम्नायेनव्यपेतपादादिपमकविकल्पोप्येपदर्शितः।अव्यपेत
व्यपेतात्माविकल्पोप्यस्ति।अव्यपेतःस्वावयववर्णावसा।व्यपेतोविजातीयपदव्यवधानात्।अव्यपे
तव्यपेतात्मातौस्वभावोपस्पसतथाप्यस्तिभेदस्तत्तीमोयाशिरस्ति।यद्यप्यपमव्यपेतयमकविकल्पएवां
तर्भविष्यति।तथाप्युक्तलक्षणांतर्गतोऽपिउभयमलाध्यपदिश्यते।कास्मिहिधर्म्यदर्शनादस्तिहिलोकेव्य
पदेशोयोहिप्राणानेवास्तिनस्तेमूस्मिमिवास्तितीप्यभिधीयतेइति तद्यथेसादिनोदाहरति तत्लक्ष्यपे
ताव्यपेतंप्रथमद्वितीयपोस्तृतीयचतुर्थपोरादिपमकमुदाहरति सौलमिल्लादिना शालंशालद्रुमं।
किंविशिष्टं शालंबकलिकासालं।सालंवाश्चताः कलिकाश्चताएवशालःप्राकारोयस्यसः सालंबकलिका
शालस्तं।सास्मालीवीक्षितुंद्रष्टुंनालंनसमर्थाः।नपरंशालमेव तथानालीनपहदानेपिवीक्षितुंनालम्।

स्तं·टि०

कथंभूता·नालीनवकुला·नालीनमाश्रितो वकुलः केसरतरुर्यैस्ते आलीनवकुलास्तास्तथा नालिकि
नीरपि पद्मिनीरपि न द्रष्टुमलमिति। कथाविहृसततसमयमधिकमस्य काचिद्विरव्यथाकदर्थितोच्यते। यतो वि
॥७॥ रहभरसंजातमनोज्वारोचकस्य जनस्यैवंविधरमणीयवस्तुदर्शनस्य दुःखहेतुत्वात्। तथा च क्रमाद् दुःखितो म
नसि सर्वमसह्यमिति प्रथमचतुर्थयोर्द्वितीयतृतीययोः पादयोरादियमकमाह कालमित्यादि काचिद्वि
रहिणी कालं समयं मीलितुं नालं न काचिदपि समर्थः। किंविशिष्टमित्याह। अनालक्ष्यतारकं। अनालक्ष्या
स्ताराज्वला भासुराः अभ्राभ्यारकाज्योतींषि यस्मिन् तत्तथा ताररताररम्यरसितं। तारउच्चैः श्रुतिस्तस्याभाव
: तारता तया रम्यं रमणीयं रसितं गर्जितं यस्मिन् तत्तत्। कालं कालः कृतान्तः तमिव। मारणात्मकत्वात्। तथा का
लमहाघनं·कालैर्महद्भिर्घना यस्मिन्निति। कालशब्दो पर्यायपर्यायो व्याख्यातः। यतस्तस्यासाधारणविशेष
क्रियोपादानादेव लब्धत्वात्। अतो यमकपर्यायो व्याख्यायः अन्यथार्थादुसन्नस्य स्वशब्दस्य पुनर्वचने पौन
रुक्त्यदोषप्रसंगः सर्वपादादियमकमाह हे सखि मां वल्लभा मम या मः। गताः स्म किंवपुपमानेत्याह। रा·म०

॥७॥

धिया बुद्ध्या संकल्पेनेति यावत्। सा वहन्ममामया सह मथितेव पीडितेव। किंभूतासीत्याह। अस्वसीया अ
सवः प्राणाः तेषामार्त्तिरूपी डामहिरहव्यथाता मायसमंतादयतेगच्छतीस स्वस्वसीया। पयोदिपाठादिह बा
जलधरादिव दन्तोनकर्मण्यपयः तस्मिन्न शिवविधिरनिष्पद्यते। कया कथितेत्याह। निशा। रात्र्या। कथंभूत
या। यथावयंमरणं यामः। पंचलमायुमतः। किं विशिष्टयेत्याह। यामत्रयाधीनाया यामया। यामः प्रहरस्तेषां त्रयं
तस्मिन्नधीनत्वं या यामोर्दैर्घ्यं यस्याः सा। तया तया यः कश्चित्सरवशः स्वानुरक्तादयितामलभमानस्तीव्रमन्म
थानलज्वालावलीढवपुः कांतां स्मरज्वरातुरां निशाम्य सख्या यं कथयति। इति व्यपेताव्यपेतयमककाढिक
स्योल्लयः इदानीं पदादियमकविकल्पं व्याख्याय प्रकृतमुपसंहरति॥ इति। एवंप्रकारा पादादियमक
त्य विकल्पगतिः प्रक्रियाई दृश्यैव। अनेन प्रकारेण विकल्पमल्पानि तु ध्यानि यमकानीतराण्यपि। मध्यादि
ध्यान्ताद्यन्तसर्वयमकरूपाणि। कुत इत्याह। नदर्शितानीत्याह। न प्रपंचभयादित्याह ४॥ कात्स्न्येनास्या
गुणमीप्सिताः। प्रपंचभयात्तग्रन्थगौरवभयात्। मध्याद्याद्यन्तयमकविकल्पाः कात्स्न्येन सामस्त्येनास्या

टि०टी० ख्यातुमीप्सिताश्चदुःकराभिमताएवकरांपतितत्रतेषुयमकेषुमध्येकेचन।सर्वपादस्थमध्ययमकव्यपे
तमुदाहरणमाह स्थिरायतेइत्यादि।स्थिराअविनश्वरीअयतिःप्रभावस्यतस्यामंत्रणांहेस्थिरायते।य
॥८॥ तांतींद्रिमा।रीचक्षुरादीनिमनःषष्ठानियस्यसःयतेंद्रियः।अतएवकृतारिषड्वर्गजयोनिगृहीतेंद्रियग्रामो
भवान्।यतेस्तपस्विनोनहीयतेनविद्यतेमायाशाठ्यंयस्याःसौअमायस्तस्यभावोऽमायता।अशाठ्यतापि
इयतेइयत्प्रमाणसुखायतितवानंदभूताय।किंभूताय।अयतित्वयंअगच्छतेविनाशंशाश्वतायेत्यर्थः व्यपेतं
सर्वपादस्थमध्ययमकमाह सभासुराजन्नित्यादि।हेराजन्तेगुणाःसुरान्देवान्नमयंतिनयांसेव।किंभूता
स्तेगुणाःभासुराःभासनशीलाः।पुनरपिकिंभूताःस्मृताः।गीताः।केषांमहीसुराणांभूमिदेवानांब्राह्म कैर्मुखैः ४
णानां।कासुसभासुपरिषत्सु।पुनरपिकिंभूतैःअसुराहतैः।सुरसामगरियसाआहतानिनसुराहतानि
असुराहतानितैः।वसुवित्तंतेनराजितानिअनुरागवंतितैः।किंभूताःगुणाः।प्रजासुचतुर्वर्णाश्रमल
क्षणासुरागात्मसुअनुरागवतीषु।राशीतांगताःपुंजीभूताः व्यवहितसर्वपादांतयमकमाहहेसत्र एम०
॥८॥

रितस्य भ्रमतया तत्वप्रियया मायया वचसा भातया तरं सरं क्षी आनंदेवो स्वतंत्रा समंतादामोदो हर्षः सु
रभिगंधो वा तेज विशेषतो मन्नातया नमे नैव ममफलं किंचन किमपि। मन्नपाकमनीयतया यतः श्रिये
पुंसौभाग्यफला हि चारुता सर्वपादांतयमकमव्यवहितमाह हे नाथ भक्ता दृशा उन्नतप्रकृतयः नतेः
रसं नम्रतामाध्यैन्यरसानुभवं न जानते। यतो विरुद्धे विरोधिनी खलु सन्नतेनते। संनतो दीनः दूनः प्रभुस्व
मोभाविः ते संनते नते यतः। तत एव पुरुषादीनाः शिरसा नते न नम्रेणाचरंति। अतोऽलंपंपाप्तिदैन्यर
सेन दीनतया परिग्रहेणाते न हेतुना ते तव सर्वपादमध्यांतयमकं व्यपेतमाह सावग्रभामांहंति। तेन
हेतुना मम जीविते न गलितम्॥ केनेत्याह। लीलया स्मितेन ईषद्धिकशितेन मधुविना। लनवदेनम्रु
नोदितेन पारुष्यरहितेनं जल्पितेन। व्यालोकितेन लघुना कथ्यमलवीक्षितेन। गुरुणागतेन मंथरगम
नेन। व्याजृंभितेन जघनेन च दर्शितेन प्रथमतृतीयपादयोर्व्यपेतं द्वितीयचतुर्थयोश्च व्यपेतं मध्यांतय
मकमाह॥ श्रीमानी सादि॥ आत्मानं परं पुरुषं स्वसाधारणाविशेषणो पादाना द्विस्मुं। तमेव हे जना

१०१८०
॥१८॥
9

आभेन मतप्रणामतः। यः स्थितिमान् स्थैर्यवान्। उत्पत्तिविनाशरहितः। मर्यादावान्वा। यस्य श्रीमा
नलक्ष्मीवान्। यस्य अमानं नमातीत्यमान्। जगत्सपर्या प्रावकाशः४। अमराः देवास्तेषां वर्त्म मार्ग आ
काशं तेन समानं सदृशं मानं परिमाणं यस्य सोऽमरवर्त्मसमानमानमानः। तं आकाशवद्व्यापकमि
त्यर्थः। आनतं च तज्जगच्च तत्र मध्यमानः प्रख्यातमानः मानः पूजा यस्य तं आकाशवद्व्यानतजगन्मध्य
मानमानं। भूः पृथ्वी तां मिमीते स्म इति भूमानः४। तंधादिपाठात् कर्त्तरि ल्युट्। कृत्यल्युटो बहुलमिति वा
कर्त्तरि ल्युट्। तं भूमानं। वामनवेषव्याजेन बलिबंधनोद्यतः वक्रवालाचलपर्यन्तं क्षितिमेकपाद
क्षेपेण मिमीतां न विद्यते मानं प्रमाणं येषां तान्यमानानि। अपरिसंख्येयानि नामान्यभिधानानि
हरिजनार्दनमधुसूदनादीनि यस्य सोऽमाननामा। तं अमाननामानं। अनंतीजीवंतीत्यानाः प्राणि
नः तैर्मतं आनमतं। न पुनरानानां मतमिति विग्रहः। क्तेन पूजायामिति समासप्रतिषेधात्॥ मति
बुद्धिपूजार्थेभ्यश्चेति तत्र विहितक्तप्रत्ययप्रयोगे क्तस्य च वर्त्तमाने इति षष्ठी विधानात्तृतीयाविभक्ते

राम०
॥१८॥

ऽनुसन्त्रिरिति भंतव्यम्। भूतकालसामान्यविवक्षायां निष्ठेसनेनक्तप्रत्ययोसन्नोनलोकाव्ययनिष्ठाख
लर्थतृणामिति षष्ठ्याः प्रतिषेधात्। कर्त्तरि तृतीयास्यादेव। ननु वर्त्तमाने लडिस धिकृत्यमत्साघर्थेभ्यो
धातुभ्यो वर्त्तमान एव काले क्तप्रत्ययस्योक्तत्वात्। भूतेकाले निष्ठेसनेन क्तप्रत्ययानुसक्तेः तृतीयाऽनुसन्त्रि
रिति चेत् सत्यमेतत्। किंतु अपवादविषयेक्वचिदुत्सर्गस्याऽपि समावेशः इति मत्यादिभ्यो भूतेऽपिनि
ष्ठा भवत्येव। अन्यथा कथमेतदुक्तं भाष्यकारेणः तैः सूत्रविन्यासोऽपि न ज्ञात इत्यलमतिप्रसंगेनेति स्मि
तम्। अ आननेर्नतं आननतमित्यनवद्यं। अप्रतिमानमानं। अप्रतिमानोऽनुपमोऽभिमानो यस्यासा
वप्रतिमानस्तं॥ ॥ व्यपेतं सर्वपादयमकमाह॥ सारमंतामित्यादि। सारमंतं कामपूरप्रणीतवास्याप
नाप्यभिहिताऽभिसरणाप्रयोगं प्रयोजयंतं वल्लभं रमयंतीरमा माणप्रेरयंती· केन। उरसा· वक्षसा सा
कांतारसामनंवैघविघोपदिष्टरसामनंजरामरणाव्याधिध्वंसि। असारं फल्गु अवैति· मन्यते· किंवि
शिष्टं तं। सारभूतं· संसारमिव वर्त्तमानम्। किंविशिष्ट। उरसा रधरा· उरसारस्तु वर्णतता विभर्त्ति वहति·

र०टि०

॥१०॥

10

कनकाभरणाभूषिता पुनरपि किंविशिष्टेत्याह। आरवः शब्दस्तेनानुकृताः सारसाः पक्षिणो यया सा आर
वानुकृतसारसा। सा चासौ कांचिस्थमेखला च तया सह वर्त्तते इति सारवानुकृतसारसकांचिः इति पूर्वेणास
म्बन्धः इति प्रथमतृतीययोराद्यन्तद्वितीयचतुर्थयोर्मध्यादिययमकव्यवहितमुदाहर्तुमाह मनयानमेत्यादि।
संधिविग्रहासनयानसंश्रयद्वैधीभावानां गुणानां याथातथ्येनानुष्ठानं नयस्तद्विपर्यासोऽनयः तौ नयान
नयौ लोचनौ यस्याः सा नयानयालोचना दण्डनीतिः। तदुक्तम्। दण्डनीत्यां नयानयाविति। नयानयालो
चनया दण्डस्या। अनया प्रसह्य मनुभूपमानया। अनो बलं तद्यासनुसरति सानया। क्षिप। तया आनयाच
तुरङ्गबलानुसारिण्या नयानयांधानविनय। नयानयावुत्कृष्टवृत्तौ तमोरंधाः। अंधाः इवांधाः कार्याकार्य
विपर्यासितमतयो मूढास्तान् विनय। शिक्षय। हे राजन् इत्यध्याहार्यम्। कथंभूत। आसमंततो नयेन
नीतिशास्त्रेण आयतिराज्ञां प्रभुता यस्य संबोधनं हे आनयायते। नीयं ततः इति नयाः अभिप्रायाः पुंसि संज्ञायां एम०
घः। तान् अपाक्षीत। अगमत्। भावान् कथंभूतान् जिनयानयान्। जिनः सुगतस्तस्य यानं ततयातीति ॥१०॥

जिनमानमा। आतोनुपसर्गे क इति कप्रत्ययः। बंधश्लेषार्थगतहरावर्जिताः। अयः पुण्यं तद्दत्तीति। अर्शादिपा
ठादसमासांतादच्। अयएव आनः प्राणो नक्तं याति। अथवा। अयश्च आनश्च अयानौ याति यो सावयाः।
नयस्तस्या मंत्रणां हे अयानय। अनायान तिरस्तानजनयसंपादय। अनया श्रितान्। अनयः उत्कालक्षणः।
अयः पुण्यं तस्य तिषेधो वा अनयः पापं तमाश्रितान पापनिरतान् पुंसो निरस्यं॥ ॥ चतुर्ष्वपि पादेष्वाद्यंत
यमकेव्यवहितमुदाहरति रवे गीत्यादि। यस्य विक्षोरवे राध्वनिनाम्नयेति उद्विग्नः। कोसौ। भौमो नरका
सुरः। कथंभूतस्य हरेरित्याह। ध्वजवर्त्तिवीरवेः॥ ध्वजवर्त्ती वीरः विः पक्षी यस्य तस्य। क्वावेति। संयति संग्रा
मे। कथंभूते अतुलास्त्रगौरवे। अनुपममस्त्रगौरवं गुरुत्वं यत्र तस्मिन्। रवेरिवारिरस्यस्येवाऽसह्यप्रता
पस्य। तस्याऽस्य पुरः पुरस्तात्। रिपुंजरासंधं अवेतजानीतानुल्यं सदृशं कस्येत्याह। अवेः। अविर्मेषस्तस्य।
भैरवेभयानके संयतीति पूर्वेणासंबंधनीयम्॥ ॥सर्वपादेष्वव्यवहितमाद्यन्तयमकमाह॥ मया
मयेत्यादि। मीनातिमारयतीतिमयः। पचाद्यच्। असावामयश्च तत्मयः व्याधिः तेनालं व्यते आप्नीयते इ

तिमपामपालब्धः सचासौ कलामपश्चेंदुः स एवामपोपस्याः साः मपामपालब्धकलामपामपातो· मपा

रं०टि० मपालब्धकलाममामपां। अमांपुरापेवतीं। अमातव्यो ऽप्राप्यो विरामो ऽवसानं यस्य येन साचमातव्यवि

रामस्तस्यामंत्रणं हे अमातव्यविराम· आमुष्मन्· सखे मांवद्व भां अहं अमपाममपामगतो ऽस्मि। किंवि

॥२२॥ शिष्टं· मपाममपा त्रिम्। यमनं पामः तस्य प्रतिषेधः अपामः अनुपरमस्तं पाति अपाममपा। अथवा। पाम

न इति न पाममपा इति क्विप् प्रतिषेधः। समासस्तु अमाद्भोज्यादिषु पागतः सिद्धः। अपाममा अविना

शिनी आर्ति ७ पीडा विरहव्यथा यस्यास्तां अपाममपा त्रिम्। कयापामहमया मित्याह। निशमारात्माहे

तुभूतया॥ किंविशिष्टयेत्याह। आममपाममपा। आममयंति हृजं ति इत्यामामाः आमामामाः प्रहरा यस्याः सा

आममपा मातया आममपा ममपाममपा सह। आममसंयोजम। कांकांताम्। हे करहणाममम। काहरीक सखे

। किंविशिष्टेन मया। आममया। आमो रोगः विरहव्यथा तां याति यः स आममपा इति क्विप्। तेन आममा· राम०

विरहव्यथाभाजा। ततो यं समुद्रापार्थः। यां वद्व भां पुरापवतीं गतो ऽस्मि संकल्पेन शरीरेणा रात्माहे नु ॥२२॥

भूतमातां चंद्रदर्शनव्याधिव्याधिव्यथाकदर्थितां। अनुपरतां विरहव्यथां। हे सखे कारुणिकमया विर
हव्यथाभाजा सहसंयोजयेति केनापि कश्चित्सखा स्मराभितप्तेन प्रियतमाप्रसंगं प्रतिप्रार्थ्यत इति।।
।।सर्वपादेष्वव्यवहितमादिमध्यांतयमकमाह।। मतामित्यादि।। हे राजन् तव मतौ बुद्धौ अपतिउपढौक
ते। का। समता समंजसता। नवकतां किं कुर्वतीस्तवेत्याह। अतताम्यतः। अनाकांक्षतः। कामित्याह। उन्न
मता विलोमताम्। उन्नमस्य भाव उन्नमता तस्या विलोमतां प्रतिकूलतां जघन्यतामनभिलषतः क
थंभूता समतेत्याह। धुनाना निरस्यंती। कां। अकामतां निःस्पृहताम्। किं विशिष्टां मतां। केषां अरम
तां विरमतां तपस्विनां। पुनरपि किं विशिष्टा। अतापेन अक्लेशेनलभ्या प्राप्या अग्निमता पांसुरःसर
तापां अनुलोमता आनुलोम्यं यया सा। आतापलब्धाग्निमतानुलोमता।। ।। चतुर्ष्वपि पादेष्वव्यवहित
मादिमध्यांतयमकमाह कालकालेत्यादि। कालो यमः। तस्य कालो विपत्तत्वादनुसत्तिविनाशकं धर्म
कलात् कालकालो महेश्वरः तस्य गलः कंठः कालो मसृणः कालं कृष्णं मुखमाननं यस्मा, सो कालमुखो

गोलांगूल कृष्णवानरः। कालकालगलश्च कालश्च कालमुखश्चेति द्वंद्वः। तेषां कालः कृष्णता तद्वंद्वमनो
दं०टि० ज्ञादिभ्यश्चेति वुञ्। अलमतिशयेन कालं शिरो यस्याः सा वलकालको मयूरः। पृषोदरादित्वादलमो
॥१२॥ ऽनुस्वारलोपः। तस्मात् लपनं विलपितं यस्मिन्न सा वलकालकालपनः स चासौ कालश्च वर्षासमयः तत्र का
लसंघनश्चेति द्वंद्वः। तद्वदतिशयेन कालाः कालकालाः। कालकाला एव कालकालकाः। ते च ते अलकाश्चे
ति विशेषणविशेष्ययोरावहुलमिति समासः। तेषामालक्षितं तेन कालकं समस्तकं यस्याः सा· कालकालग
लकालकालमुखकालका·लकालकालपनकालकालघनकालकालकालकालसितकालका इति बहुव्री
हिः। ललनैव ललनिका अलका यक्षपुरी तस्या अलकायाः स्वामी धनदः तद्वल्लकः समर्थः तस्य संपद्याज
गल्लीरागानाद्वर्षासमयः। आलगतु आलिंगतु। हे कालकालवर्षासमय। कथंभूत। कलिकालकाल· कलिश्चा
सौ कालश्च कलिकालः। तद्वत् कालः कृष्णः। तस्या मंत्रणं। अथवा· कलिरिव कालस्तद्वत् कालः कृष्णस्तस्या रा०म०
मंत्रणं। अथवा। कलिः काल इव कलिकालः दुर्भिक्षः तस्य कालः सस्यनिःफलितहेतुत्वात् विपक्षः तस्य संबो ॥१२॥

घनं· हे कलिकालकालः कालवर्षाकाल अलकालकालक· यत्तपुरीनाथ वसुसमर्थ· एवं विशेषविशिष्ट
स्मिंस्त्र भारावभासितकाठमलिकाश्मालगतु। मामिल। ध्याहार्यम॥ ॥ संदष्टयमकस्थानमित्यादि। संदष्टश्चा
सौ यमकश्च संदष्टयमकः तस्य स्थानं प्रदेशः पादयोर्द्वयोर्मध्ये दंतादितदा स संदष्टयमक इत्युच्यते। सन्दृष्टेण
शोमो ध्वजवर्तिवीरवेरवेरंवोऽश्मस्यंस्मां अतस्वादिश्वादि इति द्वंद्वः। तेषाममममर्थः। अंतपदस्याऽपि पदस्या
दिपदस्यांतपदं मध्यमकनूपं स्यात्तमप्येतत्। स्यातं अशेषमकीर्त्यते। यद्यप्याद्यंतमयमकादिष्वंतर्भव
त्येतत्। तथापि विशेषादिषु संदष्टयमकलक्षणासंगतं भूतलात् पुनः किमिति संदष्टयमकलक्षणानिरूपणं
पद्यगित्याह उक्तां तर्गतम्। अबलामानिनीक्रूरा तनुः। केनहेतुभूतेनो पोढरागा संजाता भिलावेत्याह। म
देनमदिषार्थ पथ्यग्य पितइति॥ ॥ संदष्टयमकमुदाहरति। उपोढरागेत्यादि। उपोढो रागो यया सा उ
पोढरागापि तेन मन्युरसेन यो जिता। संघेराविकारेण। तथापि मदेन सामसरानः पापंतेन मदेन साम
सापेनकार्शणसा। मन्युः क्रोधः स चासौ रसश्चरिता। यद्यपि क्रोधे रौद्ररसस्थायीभावो न रसस्तथापि स्था

दं॰ टि॰ मीमांसकोनरसस्तथापि अभेदोपचारात् कार्यकारणयोः कथंचिदेकत्वपरिमाणात् क्रोधोऽपि रस एवेति
। मन्युरसेनेत्युक्तमिति सदोषः। अत एव नयोजितानमोजयतीत्यत्र। आत्मानमप्यासहेति सामर्थ्यादवसीयते
॥१३॥ शठस्य द्विष्टत्वादन्यस्य वाक्रूपमाणत्वात् अपकृतत्वाच्च नयो जितेत्यादिकर्मणः कर्तरि कर्तरि क्तः। न केवलमे
तदेवाथात्मनगो मन्मथत्वेनेतापि निर्वतर्त्ते गंच स्वं तस्य भावोऽनंगता पि त्तां गता पित्स्मरः शारदीपि तशारीरं
13 तापिममपूर्वमिपति। इयत्समाणापतापमाख्वदापना मानवभूव। यथासंप्रतीतिमासेति। खुरवप्रयो
गो अस्तेर्भूप्रयोगादन्यत्र भूभावस्य आर्धधातुके प्रतिषेधाभावादिति॥ ॥समुद्गलक्षणमाह॥ अर्था
भ्यासः समुद्गः स्यात् ज्ञातेर्द्धं तस्य वा पदर्द्धं तस्य यो भ्यास आवृत्तिः समस्तात्। तस्य समुद्गस्य भेदाविकल्पाल्त्र
यो व्यवहिताव्यवहितोभयरूपः त्रिविधः समुद्गो भवतीसर्थः। न केवलं समुद्ग एवं वि। धात्तथापादाभ्यासो
प्यनेकात्मा। पादस्य एकशो द्वित्रिश्च योभ्यासः स व्यवहिताव्यवहितोभयभेदेनानेकात्मनेकरूपः स्यात् राम॰
। स च प्रजप्यते निदर्शने स्त्वदाहरणोपितिः॥ ॥तत्राव्यवहितं समुद्गमुदाहरति॥ ॥अनाख्येयमइत्यादिन ॥१३॥

विद्यते आदरो यस्याः सा अनास्था तस्याः संबोधनं हे अनास्थे · सखि मः त्वमावर्ज्यः परिहर्त्तव्यो ना पुरुषः
किं विशिष्टया । परमायतमानया । परमः प्रकृष्टः आयतो दीर्घो मानो गर्वो यस्याः सा परमायतमाना तया
त्वया सत एव अनाराध्यः । स्थेयः सत्वया · स्थिरतरं सत्वं बलं यस्याः सा स्थेयः सत्वा तया । परमायतमानया । परं आ
नंदवता · आयतमानया । प्रमलवत्सा ॥ ॥ अव्यवहितां समुद्गमुदाहरति । न राजिता इत्यादि । हे राजन् । कथं
भूता भवता जिता इत्याह । मानया समित्या · मानमनापूजा तया समित्या संयुज्य · तेन राजिताः न शोभिताः । किं
प्राप्य । माननया समित्या । मा नो गर्वो नयो नीतिः । मानश्च नयश्च माननयौ तत्प्रयोः सा नियत तमित्स प्राप्य एता
वता । संग्रामे भवता मारिता न पुनर्विनाशाग्रहेण उपस्थिताः ग्लसिताः । लहिता वै स्फुटम् । कथंभूतेन भवता
वैभवतापेन । विभो भर्गो वो वैभवं तत्तापयंतीत्येवं शीलो वैभवतापनस्तेन वैभव तापेन । रिपुप्रभुताप
हारिणा । कथंभूतेन । विनापनेन । आप्नोति व्याप्नोति संपत्तिर्वा आपनस्तेन व्यवहितां व्यवहितां समु
द्गमुदाहरति ॥ ॥ कलापिनामित्यादि ॥ कलापिनां शिखंडिनां वृंदानि कुलानि चारुतमारम्भतया सहर्ष

२०।८० पयांति।संगच्छंते।कलापिनांचकमुदंतत्रलपंतिएवंशीलाःकलापिनोहंसास्तेषांचआरुजापःस्वराःअपयां
तिःअपगच्छंति।हीयंते।किंभूतानाम्।वंदानिलापोढघनागमानाम्।वंदानिलोमन्दानिलस्तेननिरस्तो
।।२४।। घनोगाढःआगमःसंचरोयेषांतेवंदानिलापोढघनागमास्तेषामिति।तदेवंत्रिःप्रकारमपिसमवसरमा
मंपादाभ्यासमुमुह्यमुदाहरति।।तत्रव्यवहितमेकयाःप्रथमपादाभ्यासमाह।। ।।नमंदयेत्यादि।नमन्याद
योःपतनजीवितेश्वरःप्रियतमोमयामंदयाजउप्रकृत्यासाऽसानसमालिंग्यतेनसमालिंगितः।किंभूतया
दयावर्जितमानसात्मया।दययाकरुणयाआवर्जितोमानमस्यआत्मास्वरूपंयस्याःसातथाभूतया।पुन
रपिकिंविशिष्टयाःपुनरपिकिंविशिष्टयाआवर्जितमानसात्मया।आवर्जितःस्वीकृतःमानसात्माहंकारोयया
सातथाभूतातया।कथमालिंग्यतइत्याह।उरस्युपात्तीर्णपयोधरद्वयम्।उरसिवक्षसिउपात्तीर्णपयोधरद्वयं
स्तनद्वयंयस्मिन्नःतथ्याभवतितथाकान्चिदपहस्तितप्रेमणाप्रियतमामामानिनीस्वरहुताशंसंतमहरनुन्नो
ते।। ।।इतीयपादव्यवहितप्रथमपादाभ्याससमुदाहरति।।सभासुराणामित्यादि।सुराणांदेवानांसभा राम०
।।२४।।

ष्यापिका। किं विशिष्टा। अबला। न विद्यते बलदानवो यस्यां सा अबला। तस्यै दूरान्व्यापादितत्वात्। अत एव बलभिदुच्यते निर्दशाधीशः। किं विशिष्टा। विभूषिता। विभवः प्रभवो वहस्पतिप्रभृतयः तै र्भूषिता या सभा
सा। हे राजन्। त्वत्तव गुरवो विद्या विनयसत्यसागादिभिः आरोहिण्यानूना। किं विशिष्टैः। मृणालधवलैः। यस्य
सद्वृत्तं भूतस्त्वं पुरा नगरीणां भासुराणां भासनशीलानां। अबला लक्ष्मी भूषिता अलंकृता। विहारयन। सम्प
न्न। संपदो लक्ष्मी र्निर्दिश्या ऽनुभव॥ ॥ द्वितीयतृतीयपादव्यवहितं प्रथमपादाभ्यासमाह॥ कलंकमुक्तमि
त्यादि॥ लरतो लां विहामान्यं जनं कं न हंति। किंतु हन्त्येव। किं तादृिसाह। कलं मधुरमुक्तं भाषितम्। तथा स्तन
द्वयी चकी दशीसाह। तनुमध्यनामिका। तनु च तन्मध्यं च तस्य नामिका नमनक्रियायाः कर्त्री। अनेमा मा
साधारणां जितं द्विपत्तमुल्कम्। स्त्रीभिः कस्य न खंडितं भुवि मनइसे तारपिल्लत्नौ ऽन्यत्र व्याप्रियतइत्युक्रम
। अतो हेतोः भूतं प्राणीनं शरीरिणां कलंकमुक्तं दोषरहितं। हि स्फुटम्। अनामिका कनिष्ठिकायाः द्वितीय
स्या नगता अंगुलिः अनामिके त्युच्यते। सानिपातिर्क। गणने। संख्याने निर्देशाराको द्वाविति कर्त्तव्ये भव

न्मुखेभवल्लभधाने॥ ॥व्यवहितं द्वितीयपादाभ्यासमाह यशश्चेत्यादि। यशश्च तथा राजश्च तेन तव सैनिका रिपु
यं०टी० वितन्वते। विस्तारयंति। हे राजन्। अजोपम। अजो ब्रह्मा तेनोपमा यस्य तस्यामंत्रणं। ब्रह्मसम। दंशिताः का
सन्नाहाः। कपायुधा हेतुभूतया। संग्रामे रतो तिमावन्। किमेतदेव तव सैनिका वितन्वते उतान्यदपि कुर्वंतीत्या
॥१५॥ ह। वितनु विगतशरीरम्। अतीजसं तेजोरहितम्। अपमदं अपगतगर्वं वितन्वते जोपमदं। दंशिता निती ह्या
नि। आयुधानि शस्त्राणि मेतेतथाविधाः॥ ॥व्यवहितं द्वितीयपादाभ्यासमाह। बिभर्तीत्यादि। भुजंगमः शेषः
भूमेर्वलयं वृत्तिति मंडलं बिभर्ति दधाति। किमेकएवः नेत्याह। तेन तव भुजेन बहुना अमासह। बहुजवलस्याह
यकमंतरेणो काकीशेषो हि भुजमहीभारं वोढुम समर्थ इति। स्मरतोऽवधारमतो मत्स्यकाशा तस्य चितंए
जितं उत्कं वचनं एकं भृणु। आकर्णय। किं तदेकमुक्तमित्याह। स्वमवेस भूधरं भुजंगमो मा स्मरतो मदं चित
म। स्वं निजं भुजं बाहुं अवेस जानीहि। भूः पृथ्वी तां बिभर्ति भूधरः। तं उद्वृ भूभारं तातोद्वह त्वं स्वराजन् मदं गर्वं यम०
चितं राशीभूतं मा स्मगमः। मा काषीः त्वं गर्वमित्यर्थः॥ ॥तृतीयपादाभ्यासमाह॥ स्मरानलइत्स्मरानलः ॥१५॥
15

कामाग्निः मानविवर्द्धितो मानोचितोपः स निर्वर्तिं प्राक्तनीं प्रियानागमजनितां। तामरसेक्षणे पंकजलोच
ने सखि किं ते तवनापाकरोतिन निरस्यति। समंततात्समंततः। अपाकरोत्येव। समं प्रगपन्न ततो विस्तीर्णः।
रसे नीरसे सरोजे न स्फुटितेइति केचित्। वयस्यां संजातस्मारज्वरां मानग्रहग्रस्तविग्रहामवलोक्य काचित्
चतुरविलासिनी ममस्यग्नमर्मपूर्वकमिदमाह॥ ॥अव्यवहितं प्रथमपादाभ्यासे निदर्शयति॥ प्रभावतइ
सादि। वासवस्याखंडलस्य प्रभावतस्तेजस्विनः। नवासवस्य नवः प्रसन्नः आसवः सुरा दुग्धाब्धिमंथनोत्थितं य
स्य तस्य नामनं। नमनं नामस्तं करोतीति नामनस्तस्या मंत्रणं नमानक्रिया याः कारक। प्रभावतः प्रभावात्।
प्रभुशक्तेः। हे नाम मनः स्वमंकस्यापन्न त्वप्रणाम लपि प्रभौ प्रविष्टस्य जगतः। अतो हेतो विच्छित्तिर्नामस्फु
टमा। स्फुमतइति सर्वो याग स्तस्य न आसीत्। वभूव नैव तत्र पि भुवनं रत्तति न कदाचनापि प्रज्ञानां विच्छेदोक्षि
र्जात इत्यर्थः। अथवा किं विशिष्टस्य स तस्य। नवसवस्य। नव आसवः सोमो यास्मिन्स नवासवः अथवा
पौंडरीकयज्ञे सुरां पिबेदिति। अतो यज्ञविशेषणं नवासवस्येति॥ ॥द्वितीयपादव्यवहितं प्रथमपादाभ्या

द्वि॰टी॰ संहिराह। परंपरापाइत्यादि। परं वैरिणां लंपरापाः अगमः। गतोऽसि। कथंभूतस्त्वंबलवाः। बलं शक्तिस्तद्धा
तिगच्छतिःवलवाः। वाति। क्षिप। बलं वैरिवीर्यं चतुरंगं च वारयतीति बलवाः। वा रमतेः क्विपि णिलोपे रेफस्य वि
॥१६॥ सर्जनीये रूपम्। रणानां संग्रामाणां धूलिस्थलीः पांशुराजीनव्यो म्निनभस्थले निधाय कृत्वा हं धनु। परमस्वी
16 मिनं। परापाः प्रकृष्टापाः परंपरापाघणमावलवारणास्तेषां बलं हस्त्यश्वरथपादातिलक्षणं वारयंतीति तेःवल
वारणाः॥ ॥ द्वितीयपादस्य हि रम्यासमाह। ॥ नम्रद्दध इत्यादि। नम्रद्दधोन प्रसेमि। वाचं वदीयां। मिथ्यावित
पार्थमि। हे अलज्जनिस्त्रप भवद्विधानां। कथंभूतां वाचं। भवद्विधानं प्रयोजनं यस्याः सा भवद्विधाना। न समः
असमो विषमः स चासावहिश्च सर्पस्तस्येव तानः प्रपंचो यस्याः साऽसमाहितानाःद्विधानां द्वैधीभूतां च भ
वद्विधानां यस्याः सा भवद्विधाना भवद्विधाभावतां। अथवा भवती। जायमाने स सान्तलक्षणां यस्याः सा भव दम॰
द्विधाना तां हे असमविषमःनहिता अहितास्तेषां अहितानां वैरिणां हे अलज्जबादशानां असिरचितानां ॥१६॥
मत्रिशिष्टाष्टानां व्यलीकानां। जायमानप्रयोजनाकुटिलःभुजंगजम्रयामनस माना जात द्वैधीभावां स सान्त

संभ्रमं अहेन प्रसेमीत्यर्थः॥ ॥प्रथमपादस्य निरुक्तिमाह। सन्नाहितइत्यादि॥ ब्रह्मा तस्य मानः पूजा
सन्नाहितः सन्नद्धः सलज्जीभूतः उमानो ब्रह्मपूजा यस्मिन् सन्नाहितो माने यथा भवत्येवं अराजसत्तेन। र
जसा निर्वृत्तो राजसः न राजसः अराजसः सत्वप्रकृतिस्तस्यामंत्रणं हे अराजस। इनः स्वामिन्। सन्नाहितोमस
न्नाहिता नामरातीनां उमा कीर्तिर्यस्याः सो सन्नाहितोमः। न नमती त्यनमा। राज्ञः सेना राजसेना। राजचतुरंग
सैन्यम्। अनमा अभंगा राजसेना यस्याः सा अनमराजसेनः। सन्ना सत्पुरुषः। उमा गौरी। न विद्यते मी रोगो य
स्याः सा अवनमः सचासौ राजा च स यामपरहितश्चंद्रः। उमा च अनमराजश्च उमानमराजौ। आहितौ स्थापितौ
अर्द्धे देहे जटायां उमानमराजौ येन सः आहितोमानमराजः शिवः। तेन। सेनः। सह इनेन स्वामिना वर्त्तत इ
ति सेनः देहार्द्धमूर्द्धविवर्त्तगौरीहरचंद्रहरसेना आहराजा। सन्नाहितः कृतसन्नाहः। माप्रतिषेधे अकृतप्र
णामः। उन्नतः प्राकृते राजसे शोभसेनेति द्वितीयः प्रतिषेधः। तेनायमर्थः। हे राजन् सत्पुरुषोपस्यं सकृत
सन्नाहः। मानराजसे। अपि तु राजस एव। सन्नाहितो मानं कृतब्रह्मपूजं यथा भवत्येवं विध्वस्तारातिकीर्त्तिः

।अभंगचतुरंगबलगौरीचंद्रधरहरसेनाथपरमेश्वरपरममाहेश्वरराजोहितेस्वामिनिति कश्चिन्महीप
दं०टि० तिः कविनोपश्लोक्यते॥ ॥पादाभ्यामसमुदाहृसमहत्तामुपसंहरति। सकृदेकदेशाः द्विःत्रिश्च यः पादाभ्या
सः प्रकीर्त्तितः। एवमनंतरोक्तन्यायेन श्लोकद्वयं तु मुक्तार्थसंगतार्थम्। श्लोकाभ्यासश्चावृत्तिः स्मृतः। पद्ये
॥१७॥ मुदाहरति॥ ॥विनायकेनेति। हे राजन् पृथ्वी ममतुला निरुपमा॥ अभीताभयदहितापितुमारभ्या। किं
विशिष्टेन भवतेत्याह॥ विनायकेन सह अमुख्यो नायकं विशिष्टानायकाय यस्यासौ विनायकः तेन विनाय
17 केन। यद्वा। विनायकेन विशिष्टां श्रेणां नयतीति विनायकः सेनापतिर्वा तेन वर्त्तत इति विनायकः तेन। वृत्तोपचित
वाहुना। वृत्तौ वर्तुलौ उपचितौ पीनौ वाहू यस्यासौ वृत्तोपचितवाहुस्तेन। सुष्ठु अभिमानः तिति उतएव न अ
मित्रोद्धारी· तेन रिपून्मूलनेत्येकोर्थः॥ द्वितीयोर्थो व्याख्यायते॥ अरिरागावेरिया पृथ्वी मही ममतुलाममः कृता
तः तस्य तुलादोला· अभीता अभिमुखमिता प्राप्ताः आश्रिता। किं विशिष्टेन रिपुणा इत्याह। विनायकेन एम०
।विगतनायकेन। भवता· सता। वृत्तः संवृत्तः उपचितं वितासमीपं वाहु यस्यासौ वृत्तोपचितवाहुस्तेन। स्व ॥१७॥

स्वमित्रं स्वमित्रं तत उज्जहाति स्वमित्रोज्झस्तेन स्वमित्रत्यागिना। स्वमित्रोज्झ इति उत्पूर्वस्य जहातेः क्विपि तृ
तीयैकवचने आतो धातोरित्याकारलोपे। हस्वेव ज्जाहानिः पूर्वं चतुर्थत्वेनूपम॥ एकाकारात्मवतारः पादा
यस्य तदेकाकारचतुःपादं च तन्महायमकं इत्याद्यमोपस्य। तस्याः पि हस्यते ऽभ्यासमावृत्तिः सा परा प्रकृष्टा
उत्कृष्टाम मकक्रियायमकरचनातामुदाहरति। समानयेत्यादि॥ यस्तनयापास्तः प्रयत्नमानः पूजामास
अमानश्चयासमानो सदृशो जनाधिकमानरहितो यस्याः सा समानया समाना तया। अविद्यमाना समा
ना सदृशी यस्याः सा अममाना तया। असमानमानिरूपमया। मानोऽभिमानो गर्वो वा सह तेन वर्त्तत इति स
मानात्तया। सामिमानया सगर्वया वा। सैममः आनः प्राणो जीवितं यस्याः सा समाना प्राणसमा तया समा
नया प्राणसमया। वल्लभया समानमसंगमय। समाङ्पूर्वो गमिज संगमे वर्त्तते। असमानं स्वस्मादधिकव
लं यातीसमानमस्तस्यामंत्रणं हे असमानय। नविद्यते समोऽन्यो यस्य वसमस्तस्य संबोधनं हे असम
म अनुपम सर्वेश्व नयास हमा संसमो गंनय इति कश्चित्स्त्रियासंगमं प्रतिप्रार्थयते। समानप्रयत्नपूजन

दं०टी० पास्तगर्वयापाप्राणासल्लिभयावल्लभयातयास्तहहेऽसमानया। अस्तमसखेमांसंमोजयेति समुदायार्थः॥
॥ अत्रैकावृत्तिमहायमकसंकीर्णमुदाहरति॥ धराधराकारधराधराभुजामिति प्रथमपादे मध्याद्यव्यपेतंय
मकं। भुजा महीं पातुमहीनविक्रमा इति द्वितीयपादे व्यपेतं मध्ययमकं। क्रमात्सहंते सहसा हतारयो रयोद्धु
॥१८॥ राद्दसत्रसंहृष्टं। रयोद्धुरा मानधुरावलंबिन इत्यत्र व्यपेतं मध्यपादयमकमेकस्मिन्नेव वृत्ते इत्यतः संकीर्णमु
च्यते। अस्यायमर्थः। धरा पृथ्वी तां धरति दधातीति धराधरः शेषः तस्याकारस्याकृतिः तं धराधराकारं धरंतीति
18 धराधराधारधराः। धरां भुजंति रक्षंतीति धराभुजो राजानस्तेषां भुजाः स्ताः। महीं पृथ्वीं पातुं रक्षितुं महीनो
ऽप्यधिकः विक्रमो वीर्यं येषां ते क्रमात्त्रापातुं सहंते समर्था भवंति। सहसा स्फुटिति हता अरयो यैस्ते सहसा
हतारयः। रयो वेगस्तेनोद्धुरा उत्कटाः। मानोऽभिमानस्तस्य धूर्भारस्तेन धुरं अभिमानाग्रेसरतामवलंबंते मा
नधुरावलंबिन इति। शेषाकारधराः प्रलंबपीनाः पृथ्वीत्राणानिर्वाहवः पृथ्वीं रक्षितुं समर्थाः स्फुटिति विध्वस्ता अ रा म०
रातयोऽप्रच्युतपराक्रमाः क्रमानतिलंघनेन रयो वेगः तेनोद्धुरावाभिसिक्तानां मार्गे रसत्तावलंबि ॥१८॥

नइतिसमुदायार्थः॥ ॥प्रतिलोमयमकमाह। आवृत्तिः प्रातिलोम्येनेत्यादि। प्रातिलोम्येन प्रातिकूल्ये
न या आवृत्तिः वर्णानां पादार्द्धश्लोकगोचरा। पादार्द्धश्लोकश्चेति द्वंद्वः। ते गोचरो विषयो यस्याः सा
तद्यमकं प्रतिलोमकमिति स्मृतम्। वर्णानां प्रतिलोमादिति हेतुपदम्। तदुदाहरति॥ तत्र पादप्रतिलोम
माह॥ ॥यामताशाकृतायासा इत्येकः पादः स च प्रातिलोम्येन पठ्यते। ततोऽसावेव द्वितीयः पादो भवति
। तथा हि। सायाताकृशतामया रमणारकताते स्तु इतरः पादः। स प्रातिलोम्येन स्तूतेताकरणामर इति
चतुर्थः पादो भवति। तदयं पादद्वयं प्रतिलोम्येन पठ्यमानं पादद्वयमस्य यो निर्भवति। इति प्रातिलोम्य
मुच्यते। अस्यायमर्थः। मता आशा यस्मिन्नसौ मताशः। तस्यामंत्रणं हे मताश। कृता आयासः खेदो यया
सा कृतायासा संजनितखेदा या सा कृशतामया आशायतापाप्ता। अतः किमयं भविष्यतीति। हे रमण
का तआरकतातेस्तः इयति गच्छतीत्यारकः। तस्य भाव आरकता। गंता आगमनमस्मादुहं तवास्तु भवतु
। आगमनमस्मादंतिके तव मा भूदिति। स्तुतं स्तवमेति स्तुतेतः तस्यामंत्रणं हे स्तुतेत स्तव प्राप्तः स्तुतः।

अकारणामरश्च अविद्यमानं करणं कृतिर्येषां ते अकरणाः। अकृत्रिमाः सत्याश्च अमरा हरिहरादयो देवा यस्या
दं० ठि० स्सा वक्करणामरणामरणमहेक सत्सदेव। इदं चोपहासपरं नेर्ष्यापरवचनम्। स्कृते ताकरणोति। तेनायमर्थः। हे
पदे निर्दैवतनिंद्यविषयासम्भवादिजधार्मिकमालिकयेन लब्धाजनिताश्रतमम इद्दृशीयमापादिता परि
॥१९॥ तापाकृताकृत्स्नांगताः तस्मात्तवममागरेश्चागमनंमागमनं काचिदपि भूदिति कदाचित्काश्मिलांतः कुपितया
19 प्रेमभयनिर्भरया। स्वैषमभिधीयते॥ उक्तं पादप्रतिलोममर्द्धप्रतिलोममुदाहरति॥ ॥नादितो मदनाधीस्वा
नमेकाचनकामिता। इति श्लोकार्द्धं। एतद्देवता प्रातिलोम्येन पठ्यते· ततोऽपरार्द्धमुत्पद्यते इति अर्द्धप्रतिलो
मस्य स्वविवरणं। नादो ध्वनिरनाहतो बोध्यपुष्प्यापारजनितस्वस्वमयमहिमातिप्रपंचकस्वयमस्य हेतुनका
माद्युपद्रवविधातहेतुः शैवसिद्धांतोक्तशिलालंबनं यस्याऽसौ नादिविभूतिप्राप्तो योगी तस्मान्नादितो
योगिनः कामोयोपि। हाघभिलाषायो यस्याः साम्मदेनधीर्बुद्धिः स्वास्वकीयापत्तोननैवममकाचनकाचि एम०
दपि· कामिता· तथा· तामिका। तमुकांतायां वर्त्तते· तमनंगततातामिका। भावेवुञ्। तामिका आकांक्षासा ॥१९॥

चनैव कनकामिनहेतुभूतेन। किंविशिष्टेन। दमनोदिना। दमनं उपशमस्तं नुदत्यपनयतीति तत्‌ दमनोदिना
। किंविशिष्टा। स्वाधीना स्वायत्ता तेन तास्सर्पतास्सर्पार्थ्यमो निनीवीतरागस्य बुद्धिवकामतो तो मममनक
चनरागिता अस्ति तव कामिनोपशमशापतेन भवतित्तव मनोभव विषयाकाचन तृष्णाऽस्ति। अहं च योगी
तत्तोमहेतुभूतेन किमेकादृशादिबाधास्तीति कश्चि। मुनिः चित्तप्रसादनिमित्तं पकर्मविरचयति॥ ॥श्लो
कप्रतिलोममुदाहरति। यानमानममाराविकशोनानजनासना। यामुदारश्शताधीनामामायामनमना दिश
। अयमेव श्लोकः प्रातिलोम्येन यमेततत्‌ तदा परो भिन्नार्थः श्लोको भवतीति श्लोकप्रतिलोमस्य व्याख्या। या
नमानं मदुत्कम्‌। हरिर्महायमनेन नानुयापिनं महाज्ञाननमानुसारिणामिसर्पः। ततो यतो ज्ञानार्थवृत्तेः
। मानोऽभिमानः पूजा वा। यानं च मानश्च यानमानौ तौ यातीति यानमानमया। ज्ञानिनो मानिनो पूजाश्च मार
यतीति मारः कामस्तमवंति रक्षयंतीति नियममयं तिमाराविनो जितेंद्रियाः। यानमानाश्च ते माराविनश्च तेषां
यानमानममारावीणां कशोर्वचमपध्धि रिवपाकरोतीति चित्तविकारहेतुत्वेन दुःसहत्वात्‌। तथाजना

रं॰टी॰ नजनासनता।जनः आनः प्राणाः सत्वं मनोबलं येषां तेजनानाः।तेच तेजनाश्च तेषामासनता।आसमंतात् अ
स्यति निरस्यति बाधत इत्यासनता अस्य आङ् पूर्वस्य नंद्यादिपाठात् कर्त्तरि ल्युट्।कर्मणि षष्ठीसमासः।योमु
॥२०॥ दाहं रताश्यात्याधीनामायामननमनादिना।उदाहरणः प्रभवस्तेषां शतानि तेषामामयत्ताश्च धीनाताता सामया।आयमा
गमननमनादि अभिहता आहृतेति यावत्।आपमानादिनेस्यचतुर्विशासिगुणेनवमसतेतदकीर्तितमाचरि
20 तं कविनेति कर्मकारकम्।ततः प्रधाने कर्मण्यापायमिस्यत्र द्वितीया भवत्येव।तस्या ऽनभिहितत्वात्कर्मणि द्विती
यान भवति।प्रातिपदिकार्थमात्रे प्रथमैव।ततोयमर्थः।याकांताज्ञानाभिमानयुक्तजितेंद्रियजनानामपि चित्त
विकारहेतुत्वेन दुःखोत्सारिणी या च मनोबलविकलरजोबहुलजनस्य नितरामशर्महेतुः या च पूर्वमिहमक
दाचिदुदारप्रभुत्वात्तामयत्तामागमं त्वामयामयाआमयाप्रमागच्छेत्याहृतेति।इत्यानुलोम्येन व्याख्यातम्।प्रातिकूल्ये
नव्याचक्ष्महे॥ ॥सादिनामयमायामानाधीताशारदामुया।नोत्सनाजननाशोकविरामायनमानया।या राम॰
कांतामयात्र नमनादिसादिनामयमायामानाधीताशारदामुयातेतिसंबंधः दिनमेवामयोरोगस्तं दिनामया। ॥२०॥

अनेनशरत्कालेनहेतुभूतेनचनअधीतैवप्राप्तकिंविशिष्यासेसाह।आमामा।अपगतो।आभिमुख्येना
नाप्यतेइत्सादयन्आमाः आमद्भवामोविरहबाधायमासा।आममाविरहदुःखपीडितेत्यर्थः।तथाप्यासन्ना
जनाना·आसन्नमासन्ना।असेर्धातोरयंतातद्यपासश्लेषेतिभावेमुच्।आसन्ना।अवस्थानेमागनाभावस्तं
जनयत्साम्नाजनानांनंद्यादिपाठात्कर्त्तरिल्युट्।अतएवशोकविरामायविश्रागदुःखापनोदायनभव
ति।मतश्चमानायामानोऽभिमानोऽहंकारस्वः।यदुक्तमभिमानोहंकारस्तंमातिअनुसरतीतिमामानया
मानिनीयतोऽतोनशोकविरामायेति।मानयाइतिविशेषणमपीदंहेतुत्वेनद्रष्टव्यम्।यथागुरवोराजमा
षानभक्षणीयाःगुरुत्वादितिप्रतीयते।यथा·यत्कृतकंतदनित्यम्।इतीदंविशेषणमपिकृतकत्वादितिहेतुः
।तथामानयेतिमानित्वादितिद्रष्टव्यम्।नशोकेविरामायेतिसाध्यनिर्देशत्वात्·अलमतिविस्तरेणोक्तो
पावानर्थः॥समुदायार्थोव्याख्यायते॥यामममामदंतिकमागच्छेत्साहृतासानेनप्रसन्नसलिलाशयसमु
त्फुल्लकमलवलयकह्लारहारिवारिणाप्रच्छदस्यःपुंजपिंजरंगुडलंचरीकनीकरजकारिणाव्याधिनेवस

न्तद्दृव्यारागासनेन·जिनपतिवचनेनैव प्रतिबोधितभव्यबंधुजीवेन·गुरुणाऽनेनैव·प्रसादितदिगंबरेण·ससवा
दं०टी० क्येनेवोदितविरुद्धपक्षेण। शरत्समयेन दिनाऽभिधानं व्याधिमधिगतवत्सेव·पतोनिशिनिद्रामुद्रितांतर्बहि
॥२१॥ ष्करणस्य·तिरोहितचैतन्यस्य स्वप्नोपलब्धप्रियसमागमसुखस्य न तथा विरहव्यथानकंपहेतुर्मयाऽहीति
।तथापीयमनस्विनी प्रकृत्या प्रियतमानमस्पर्शमसमागमवतो मनो मे गुरुविरहाबाधाविधुरं सुखी भविष्यती
ति। कश्चिन्मन्मथव्यथितः सखायमिदमभ्यधात्॥ ॥गोमूत्रिकालक्षणमाह॥ वर्णानामेकरूपत्वं। वर्णानामक्ष
राणामेकरूपत्वं यद्येकांतरमेकैर्न वर्णैर्नरएकैकाक्षरेणांतरितमव्यवहितं विजातीयेन यस्मां भवेत्। अर्द्ध
यो श्लोकस्य पूर्वार्द्धपश्चिमार्द्धयोस्तदागोमूत्रिकाख्यादिति। एवं तमभकमाहुर्दुष्करं दुर्विरचं तद्विदो दुष्करवि
दः स्वयः। तदुदाहरति॥ ॥मदनो मदिराक्षीणामपांगास्त्रं जयेदयम्। मदनो यदि तत्क्षीणमनंगं नंगापांज
लिं दधे॥ अयं मदनः कामो मदिराक्षीणां विलोललोचनानामपांगास्त्रं·अपांगकटाक्षनिरीक्षणांत राम०
देवास्त्रमायुधं मिव शोषकामुकजनवश्यतोपनयात्मारणालकलाहाय दिजयेत·जेतुं शक्नुयात्। यदा ॥२१॥

मदेनोममपापंचनप्राक्तनंहीर्णांत्तमंगतंभवेत्। किंचैवंयदिस्यात्तदाहमनंगायकामायांजलिंदधेकुर्वे क
श्चित्कामीमानिन्यानिराकृतस्तांकामायसंराजितांकर्तुमिच्छन्नुदमाह। यदिकामस्तस्याःकथंचनिरीक्षणात्स्वं
जयेत्। तानुरक्तांवक्ष्यांकुयत्तिदाहमेवंविधायास्य हृदिपस्तत्त्वप्रकारिरोगोपकारिरोगोमदनामप्रसीदाद्योभग्यदो
षसंजातसंतोषोल्लासाद्ग्रदितकरकमलोनमःकुर्वे॥ ॥अर्द्धभ्रमलक्षणमाह॥ आहुरर्द्धभ्रमंनामश्लोकार्द्ध
भ्रमणंयदि। श्लोकस्ययघर्द्धेनेवभ्रमणंयदिश्लोकेऽर्द्धभ्रमतिनसर्वतः तदातमर्द्धभ्रममाहुराचार्याः॥ ॥सर्वतो
भद्रलक्षणमाह॥ तदिष्टंसर्वतोभद्रंभ्रमणंयदिसर्वतः॥ यदिसर्वतःतिर्यकूचश्लोकस्यभ्रमणंस्यात्तदातत्सर्वतो
भद्रमितीष्टंसूरिभिः॥ तत्रार्द्धभ्रमंतावदुदाहरति॥ ॥ मनोभवतवानीकंनोदयायनमानिनी। भयादमेमामा
मावावयमेमोममानत। हेमनोभव चित्तजन्मन्मानिनीमानवतीमास्त्रीसातवानीकंलदीयंसन्यंसातत्कतद्
